| | |
|---|---|
| विषयनाम | : बौद्धदर्शनम् |
| कक्षा | : शास्त्रितृतीयवर्षम् |
| सत्रार्द्धः | : षष्ठः |
| पत्रम् | : षष्ठम् |
| प्रश्नपत्रकूटाङ्कः | : 2235B |
| पाठ्यग्रन्थः | : अर्थविनिश्चयसूत्रम् |

-डॉ गुरुचरण सिंह नेगी
असिस्टैण्ट प्रोफेसर
बौद्धदर्शन विभाग
राष्ट्रिय संस्कृत संस्थान
(Accredited by NAAC with ‘A’ Grade)
(मानित विश्वविद्यालय)
लखनऊ परिसर, विशाल खण्ड 4, गोमती नगर, लखनऊ- 10
email ID : drgcsnegi@gmail.co

# अर्थविनिश्चयसूत्र-सम्बन्धितानि प्रश्नोत्तराणि

(प्र.) अर्थविनिश्चयसूत्रस्य उपदेशकर्ता कः?
(उ.) भगवान् बुद्धः।
(प्र.) कति स्कन्धाः?
(उ.) पञ्चस्कन्धाः।
(प्र.) उपादानस्कन्धाः कति?
(उ.) पञ्चोपादानस्कन्धाः।
(प्र.) कति आयतनानि?
(उ.) द्वादशायतनानि।
(प्र.) कति धातवः?
(उ.) अष्टादश धातवः।
(प्र.) प्रतीत्यसमुत्पादस्य कति अङ्गाः?
(उ.) द्वादशाङ्गाः।
(प्र.) संस्काराः कतमे?
(उ.) त्रयः संस्काराः। कायसंस्कारः, वाक्संस्कारः मनःसंस्कारश्चेति।

(प्र.) विज्ञानं कतमत्?

(उ.) षड् विज्ञानकायाः।

(प्र.) षडायतनं कतमत्?

(उ.)चक्षुरायतनम्, श्रोत्रायतनम्, घ्राणायतनम्, गन्धायतनम्, जिह्वायतनम्, कायायतनम्, मन आयतनञ्चेति।

(प्र.) स्पर्शः कतमः?

(उ.) षट् स्पर्शकायाः।

(प्र.) षट् स्पर्शकायाः कतमे?

(उ.)चक्षुसंस्पर्शः, श्रोत्रसंस्पर्शः, घ्राणसंस्पर्शः, जिह्वासंस्पर्शः, कायसंस्पर्शः, मनः संस्पर्शश्चेति।

(प्र.) वेदना कतमा?

(उ.) षड् वेदनाः।

(प्र.) कतमाः षड् वेदनाः?

(उ.) चक्षुसंस्पर्शजा, श्रोत्रसंस्पर्शजा, घ्राणसंस्पर्शजा, जिह्वासंस्पर्शजा, कायसंस्पर्शजा, मनःसंस्पर्शजा चेति।

(प्र.) कतमा तृष्णा?

(उ.) षट् तृष्णाकायाः।

(प्र.) कतमे षट् तृष्णाकायाः?

(उ.) रूपतृष्णा, शब्दतृष्णा, गन्धतृष्णा, रसतृष्णा, स्पर्शतृष्णा, धर्मतृष्णा।

(प्र.) उपादानं कतमत्?

(उ.) चत्वारि उपादानानि।

(प्र.) कतमानि चत्वारि उपादानानि?

(उ.)कामोपादानम्, दृष्ट्युपादानम्, शीलव्रतोपादानम्, आत्मवादोपादानञ्चेति।

(प्र.) भवः कतमः?

(उ.) त्रयो भवाः।

(प्र.) कतमे त्रयो भवाः?

(उ.) कामभवः, रूपभवः आरूप्यभवश्चेति।

(प्र.) कतमे षट् कामावचराः देवाः?

(उ.)चातुर्महाराजिका देवाः, त्रायस्त्रिंशाः, यामाः, तुषिताः, निर्माणरतयः, परनिर्मितवशवर्तिनो देवाः।

(प्र.) आरूप्यधातवः कतमा?

(उ.) आकाशानन्तयायनम्, विज्ञानानन्तयातनम्, आकिञ्चन्यायतनम्, नैवसंज्ञानासंज्ञायतनञ्च।

(प्र.) कतमानि चत्वारि आर्यसत्यानि?

(उ.) दुःखम् आर्यसत्यम्, समुदयः आर्यसत्यम्, दुःखनिरोध आर्यसत्यम्, दुःखनिरोधगामिनी प्रतिपदार्यसत्यम्।

(प्र.) कति ब्रह्मविहाराः?

(उ.) चत्वारो ब्रह्मविहाराः।

(प्र.) कतमे चत्वारो ब्रह्मविहाराः?

(उ.) मैत्री, करुणा, मुदिता, उपेक्षा चेति।

(प्र.) ति प्रतिसंवितः ?

(उ.) चतस्रः प्रतिसंवितः।

(प्र.) कति स्मृत्युपस्थानानि?

(उ.) चत्वारि स्मृत्युपस्थानानि।

(प्र.) कतमानि सम्यक् प्रहाणानि?

(उ.) चत्वारि सम्यक् प्रहाणानि।

(प्र.) कति ऋद्धिपादाः?

(उ.) चत्वार ऋद्धिपादाः।

(प्र.) पञ्च लोकोत्तराणि इन्द्रियानि कानि?

(उ.) श्रद्धेन्द्रियम्, वीर्येन्द्रियम्, स्मृतीन्द्रियम्, समाधीन्द्रियम्, प्रज्ञेन्द्रियं च।

(प्र.) पञ्च बलानि कानि?

(उ.) श्रद्धाबलम्, वीर्यबलम्, स्मृतिबलम्, समाधिबलम्, प्रज्ञाबलं च।

(प्र.) कति बोध्यङ्गानि?

(उ.) सप्तबोध्यङ्गानि।

(प्र.) कतम आर्याष्टाङ्गिकमार्गः?

(उ.) सम्यग्दृष्टिः, सम्यक् संकल्पः, सम्यग्वाक्, सम्यक् कर्मान्तः, सम्यग् आजीवः, सम्यग्व्यायामः, सम्यक् स्मृतिः, सम्यक् समाधिः।

(प्र.) कति तथागतबलानि?
(उ.) दश तथागतबलानि।
(प्र.) तथागतस्य कति वैशारद्यानि?
(उ.) चत्वारि वैशारद्यानि।
(प्र.) आवेणिकाः बुद्धधर्माः कति?
(उ.) अष्टादशावेणिका बुद्धधर्माः।
(प्र.) कति महापुरुषलक्षणानि?
(उ.) द्वात्रिंशत् महापुरुषलक्षणानि।
(प्र.) अनुव्यञ्जनानि कति?
(उ.) अशीत्यनुव्यञ्जनानि।

•••